## READING - 5

यदा रामः सीतामपश्यत्तदा तस्यामन्वरज्यत । तस्मिन्काले बहवो राजानः सीतायाः स्वयंवरायागच्छन् । जनको राजैवमवदच्च । यः को ऽपि राजा शिवस्य चापे बाणं संदधाति स मम कन्यां परिणयतीति । नृपा अचिन्तयन् । अहो एतेन* सुलभेन कर्मणा सोत्तमा नारी ममैव भार्या भवतीति। गर्वितास्ते मूर्खा नाजानन्यच्छम्भोश्चापो ऽतीव गुरुरिति । अथापि सर्वे प्रायतन्त । न कश्चन राजा तस्मिन्कर्मणि समर्थ आसीत् । अन्ततः श्रीरामो बालको ऽपि तं चापमुपागच्छत् । राजानस्तमपश्यन्प्राहसंश्च । अहो एष* बालको वीराणां कर्मणि प्रयतत इति । स न किमप्यवदत् । किंतु चापं पत्रमिव लीलयोदहरदभनक्च । राजानो ऽक्रुध्यन्किंतु जनकः सीता चातुष्यताम् ॥

---

* See 5.5